# रुद्र स्वाहाकार विधिः

1. नमस्ते रुद्र मन्यव उतोत इषवे नमः । नमस्ते अस्तु धन्वने
बाहुभ्या मुत ते नम स्स्वाहा ॥

2. या त इषुश्शिवतमा शिव म्बभूव ते धनुः । शिवा शरव्या
या तव तया नो रुद्र मृडय स्वाहा ॥

3. या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तनुवा
शन्तमया गिरिशन्ता ऽभिचाकशीहि स्वाहा ॥

4. यामिषु ङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे । शिवा ङ्गिरित्र ता ङ्कुरु
मा हिग्ं‌सीः पुरुष ञ्जगत् स्वाहा ॥

5. शिवेन वचसा त्वा गिरिशा ऽच्छा वदामसि । यथा
नस्सर्वमिज्जग दयख्ष्मगं सुमना असथ्स्वाहा ॥

6. अध्यवोच दधिवक्ता प्रथमो दैव्यो भिषक् । अहीग्́ श्च सर्वा
ञ्जम्भय न्थ्सर्वाश्च यातुधान्य स्स्वाहा ॥

7. असौ यस्ताम्रो अरुण उत बभ्रु स्सुमङ्गलः । ये चेमाग्́
रुद्रा अभितो दिखु श्रिता स्सहस्रशो ऽवैषाग्́ हेड ईमहे
स्वाहा ॥

8. असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैन ङ्गोपा
अदृश न्नदृश न्नुदहार्यः । उतैनं विश्वा भूतानि स दृष्टो
मृडयाति न स्स्वाहा ॥

9. नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये
अस्य सत्वानोऽह न्तेभ्योऽकर न्नम स्स्वाहा ॥

10. प्र मुञ्च धन्वनस्त्वमुभयो रार्त्नि योर्ज्याम् । याश्च ते हस्त
इषवः परा ता भगवो वप स्वाहा ॥

11. अवतत्य धनुस्त्वगं सहस्राख्ष शतेषुधे । निशीर्य शल्याना

म्मुखा शिवो नस्सुमना भव स्वाहा ॥

12. विज्यन्धनुः कपर्दिनो विशल्यो बाणवागं उत । अनेश

न्नस्येषव आभु रस्य निषङ्गथि स्स्वाहा ॥

13. या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तया ऽस्मान्

विश्वतस्त्व मयख्ष्मया परिब्भुज स्वाहा ॥

14. नमस्ते अस्त्वायुधाया ऽनातताय धृष्णवे । उभाभ्यामुत ते

नमो बाहुभ्या न्तव धन्वने स्वाहा ॥

15. परि ते धन्वनो हेति रस्मा न्वृणक्तु विश्वतः । अथो य इषुधि

स्तवा ऽऽरे अस्मन्नि धेहि तग्ग् स्वाहा ॥

16. नमो हिरण्यबाहवे सेनान्ये दिशा ञ्च पतये नम स्स्वाहा ॥

17. नमो वृख्षेभ्यो हरिकेशेभ्यः पशूना म्पतये नम स्स्वाहा ॥

18. नमस्ससस्पिञ्जराय त्विषीमते पथीना म्पतये नम स्स्वाहा ॥

19. नमो बभ्लुशाय विव्याधिने ऽन्नाना म्पतये नम स्स्वाहा ॥

20. नमो हरिकेशायोपवीतिने पुष्टाना म्पतये नम स्स्वाहा ॥

21. नमो भवस्य हेत्यै जगता म्पतये नम स्स्वाहा ॥

22. नमो रुद्रायाऽऽततायिने क्षेत्राणा म्पतये नम स्स्वाहा ॥

23. नम स्सूतायाऽहन्त्याय वनाना म्पतये नम स्स्वाहा ॥

24. नमो रोहिताय स्थपतये वृक्षाणा म्पतये नम स्स्वाहा ॥

25. नमो मन्त्रिणे वाणिजाय कक्षाणा म्पतये नम स्स्वाहा ॥

26. नमो भुवन्तये वारिवस्कृतायौषधीना म्पतये नम स्स्वाहा ॥

27. नम उच्चैर्घोषायाऽऽक्रन्दयते पत्तीना म्पतये नम स्स्वाहा ॥

28. नमः कृथ्स्नवीताय धावते सत्त्वना म्पतये नम स्स्वाहा ॥

29. नम स्सहमानाय निव्याधिन आव्याधिनीना म्पतये नम

स्स्वाहा ॥

30. नमः ककुभाय निषङ्गिणे स्तेनाना म्पतये नम स्स्वाहा ॥

31. नमो निषङ्गिण इषुधिमते तस्कराणा म्पतये नम स्स्वाहा ॥

32. नमो वञ्चते परिवञ्चते स्तायूना म्पतये नम स्स्वाहा ॥

33. नमो निचेरवे परिचराया ऽरण्याना म्पतये नम स्स्वाहा ॥

34. नम स्सृकाविभ्यो जिघाग्ंसद्भ्यो मुष्णता म्पतये नम
स्स्वाहा ॥

35. नमोऽसिमद्भ्यो नक्त ञ्चरद्भ्यः प्रकृन्ताना म्पतये नम
स्स्वाहा ॥

36. नम उष्णीषिणे गिरिचराय कुलुञ्चाना म्पतये नम स्स्वाहा ॥

१.37. नम इषुमद्भ्यो धन्वाविभ्यश्च वो नम स्स्वाहा ॥

37. नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नम स्स्वाहा ॥

38. नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नम स्स्वाहा ॥

39. नमोऽस्यद्भ्यो विद्यद्भ्यश्च वो नम स्स्वाहा ॥

40. नम आसीनेभ्य श्शयानेभ्यश्च वो नम स्स्वाहा ॥

41. नमस्स्वपद्भ्यो जाग्रद्भ्यश्च वो नम स्स्वाहा ॥

42. नम स्तिष्ठद्भ्यो धावद्भ्यश्च वो नम स्स्वाहा ॥

43. नम स्सभाभ्यस्सभापतिभ्यश्च वो नम स्स्वाहा ॥

44. नमो अश्वेभ्यो ऽश्वपतिभ्यश्च वो नम स्स्वाहा ॥

45. नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नम स्स्वाहा ॥

46. नम उगणाभ्य स्तृग्ंहतीभ्यश्च वो नम स्स्वाहा ॥

47. नमो गृथ्सेभ्यो गृथ्सपतिभ्यश्च वो नम स्स्वाहा ॥

48. नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नम स्स्वाहा ॥

49. नमो गणेभ्यो गणपतिभ्यश्च वो नम स्स्वाहा ॥

50. नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नम स्स्वाहा ॥

51. नमो महद्भ्यः खुल्लकेभ्यश्च वो नम स्स्वाहा ॥

52. नमो रथिभ्यो ऽरथेभ्यश्च वो नम स्स्वाहा ॥

53. नमो रथेभ्यो रथपतिभ्यश्च वो नम स्स्वाहा ॥

54. नम स्सेनाभ्य स्सेनानिभ्यश्च वो नम स्स्वाहा ॥

55. नमः खत्तृभ्य स्सङ्ग्रहीतृभ्यश्च वो नम स्स्वाहा ॥

56. नम स्तखभ्यो रथकारेभ्यश्च वो नम स्स्वाहा ॥

57. नमः कुलालेभ्यः कर्मारेभ्यश्च वो नम स्स्वाहा ॥

58. नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नम स्स्वाहा ॥

59. नम इषुकृद्भ्यो धन्वकृध्भ्यश्च वो नम स्स्वाहा॥

60. नमो मृगयुभ्य श्श्वनिभ्यश्च वो नम स्स्वाहा ॥

61. नम श्श्वभ्यश्श्वपतिभ्यश्च वो नम स्स्वाहा ॥

62. नमो भवाय च रुद्राय च स्वाहा ॥

63. नम श्शर्वाय च पशुपतये च स्वाहा ॥

64. नमो नीलग्रीवाय च शितिकण्ठाय च स्वाहा ॥

65. नमः कपर्दिने च व्युप्तकेशाय च स्वाहा ॥

66. नम स्सहस्राक्षाय च शतधन्वने च स्वाहा ॥

67. नमो गिरिशाय च शिपिविष्टाय च स्वाहा ॥

68. नमो मीढुष्टमाय चेषुमते च स्वाहा ॥

69. नमो ह्रस्वाय च वामनाय च स्वाहा ॥

70. नमो बृहते च वर्षीयसे च स्वाहा ॥

71. नमो वृद्धाय च संवृध्वने च स्वाहा ॥

72. नमो अग्रियाय च प्रथमाय च स्वाहा ॥

73. नम आशवे चा ऽजिराय च स्वाहा ॥

74. नम श्शीघ्रियाय च शीभ्याय च स्वाहा ॥

75. नम ऊर्म्याय चा ऽवस्वन्याय च स्वाहा ॥

76. नम स्स्रोतस्याय च द्वीप्याय च स्वाहा ॥

77. नमो ज्येष्ठाय च कनिष्ठाय च स्वाहा ॥

78. नमः पूर्वजाय चा ऽपरजाय च स्वाहा ॥

79. नमो मध्यमाय चा ऽपगल्भाय च स्वाहा ॥

80. नमो जघन्याय च बुध्नियाय च स्वाहा ॥

81. नम स्सोभ्याय च प्रतिसर्याय च स्वाहा ॥

82. नमो याम्याय च क्षेम्याय च स्वाहा ॥

83. नम उर्वर्याय च खल्याय च स्वाहा ॥

84. नम श्लोक्याय चा ऽ वसान्याय च स्वाहा ॥

85. नमो वन्याय च कक्ष्याय च स्वाहा ॥

86. नम॑ श्श्र॒वाय॑ च प्रतिश्र॒वाय॑ च॒ स्वाहा॑ ॥

87. नम॑ आ॒शुषे॑णाय चा॒ ऽऽशुरथाय च॒ स्वाहा॑ ॥

88. न॒म श्शूरा॑य चा ऽवभिन्द॒ते च॒ स्वाहा॑ ॥

89. नमो॑ व॒र्मिणे॑ च वरू॒थिने॑ च॒ स्वाहा॑ ॥

90. नमो॑ बि॒ल्मिने॑ च कव॒चिने॑ च॒ स्वाहा॑ ॥

91. नम॑ श्श्रु॒ताय॑ च श्रुतसे॒नाय॑ च॒ स्वाहा॑ ॥

92. नमो॑ दुन्दु॒भ्या॑य चा ऽऽहन॒न्या॑य च॒ स्वाहा॑ ॥

93. नमो॑ धृ॒ष्णवे॑ च प्रमृ॒शाय॑ च॒ स्वाहा॑ ॥

94. नमो॑ दू॒ता॑य च॒ प्रहि॑ताय च॒ स्वाहा॑ ॥

95. नमो॑ निष॒ङ्गिणे॑ चेषुधि॒मते॑ च॒ स्वाहा॑ ॥

96. नम॑ स्ती॒क्ष्णेष॑वे चा ऽऽयु॒धिने॑ च॒ स्वाहा॑ ॥

97. नम॑ स्स्वायु॒धाय॑ च सु॒धन्व॑ने च॒ स्वाहा॑ ॥

98. नम स्स्रुत्याय च पथ्याय च स्वाहा ॥

99. नमः काट्याय च नीप्याय च स्वाहा ॥

100. नम स्सूद्याय च सरस्याय च स्वाहा ॥

101. नमो नाद्याय च वैशन्ताय च स्वाहा ॥

102. नमः कूप्याय चा ऽवट्याय च स्वाहा ॥

103. नमो वर्ष्याय चा ऽवर्ष्याय च स्वाहा ॥

104. नमो मेघ्याय च विद्युत्याय च स्वाहा ॥

105. नम ईध्रियाय चा ऽऽतप्याय च स्वाहा ॥

106. नमो वात्याय च रेष्मियाय च स्वाहा ॥

107. नमो वास्तव्याय च वास्तुपाय च स्वाहा ॥

108. नमस्सोमाय च रुद्राय च स्वाहा ॥

109. नम स्ताम्राय चा ऽरुणाय च स्वाहा ॥

110. नमः श्शङ्गाय च पशुपतये च स्वाहा ॥

111. नम उग्राय च भीमाय च स्वाहा ॥

112. नमो अग्रेवधाय च दूरेवधाय च स्वाहा ॥

113. नमो हन्त्रे च हनीयसे च स्वाहा ॥

114. नमो वृक्षेभ्यो हरिकेशेभ्य स्वाहा ॥

115. नम स्ताराय स्वाहा ॥

116. नम श्शम्भवे च मयोभवे च स्वाहा ॥

117. नम श्शङ्कराय च मयस्कराय च स्वाहा ॥

118. नम श्शिवाय च शिवतराय च स्वाहा ॥

119. नम स्तीर्थ्याय च कूल्याय च स्वाहा ॥

120. नमः पार्याय चा ऽवार्याय च स्वाहा ॥

121. नमः प्रतरणाय चोत्तरणाय च स्वाहा ॥

122. नम आतार्याय चा ऽऽलाद्याय च स्वाहा ॥

123. नम श्शाष्प्याय च फेन्याय च स्वाहा ॥

124. नम स्सिकत्याय च प्रवाह्याय च स्वाहा ॥

125. नम इरिण्याय च प्रपथ्याय च स्वाहा ॥

126. नमः किग्ंशिलाय च ख्षयणाय च स्वाहा ॥

127. नमः कपर्दिने च पुलस्तये च स्वाहा ॥

128. नमो गोष्ठ्याय च गृह्याय च स्वाहा ॥

129. नम स्तल्प्याय च गेह्याय च स्वाहा ॥

130. नमः काव्याय च गह्वरेष्ठाय च स्वाहा ॥

131. नमो ह्रदय्याय च निवेष्प्याय च स्वाहा ॥

132. नमः पाग्ंसव्याय च रजस्याय च स्वाहा ॥

133. नम श्शुष्क्याय च हरित्याय च स्वाहा ॥

134. नमो लोप्याय चोलप्याय च स्वाहा ॥

135. नम ऊर्व्याय च सूर्म्याय च स्वाहा ॥

136. नमः पर्ण्याय च पर्णशद्याय च स्वाहा ॥

137. नमो ऽपगुरमाणाय चा ऽभिघ्नते च स्वाहा ॥

138. नम आक्खिदते च प्रक्खिदते च स्वाहा ॥

139. नमो वः किरिकेभ्यो देवानाग्ं हृदयेभ्य स्स्वाहा ॥

140. नमो विख्षीणकेभ्यो देवानाग्ं हृदयेभ्य स्स्वाहा ॥

141. नमो विचिन्वत्केभ्यो देवानाग्ं हृदयेभ्य स्स्वाहा ॥

142. नम आनिर्हतेभ्यो देवानाग्ं हृदयेभ्य स्स्वाहा ॥

143. नम आमीवत्केभ्यो देवानाग्ं हृदयेभ्य स्स्वाहा ॥

144. द्रापे अन्धस स्पते दरिद्र न्नीललोहित । एषा म्पुरुषाणा मेषा
म्पशूना म्मा भेर्माऽरो मो एषा ङ्किञ्चना ऽऽमम थ्स्वाहा ॥

145. या ते रुद्र शिवा तनूश्शिवा विश्वाहभेषजी । शिवा रुद्रस्य भेषजी तया नो मृड जीवसे स्वाहा ॥

146. इमागं रुद्राय तवसे कपर्दिने ख्षयद्वीराय प्र भरामहे मतिम् । यथा नश्श मस द्विपदे चतुष्पदे विश्व म्पुष्ट ङ्ग्रामे अस्मि न्ननातुरग्ग् स्वाहा ॥

147. मृडा नो रुद्रोत नो मय स्कृधि ख्षयद्वीराय नमसा विधेम ते । यच्छ ञ्च योश्च मनु रायजे पिता त दश्याम तव रुद्र प्रणीतौ स्वाहा ॥

148. मा नो महान्त मुत मा नो अर्भक म्मा न उख्षन्त मुत मा न उख्षितम् । मा नो वधीः पितर म्मोत मातर म्प्रिया मा नस्तनुवो रुद्र रीरिष स्स्वाहा ॥

149. मा नस्तोके तनये मा न आयु षि मा नो गोषु मा नो अश्वेषु

रीरिषः । वीरान्मा नो रुद्र भामितो वधीऱ्हविष्मन्तो नमसा

विधेम ते स्वाहा ॥

150. आरात्ते गोघ्न उत पूरुषघ्ने ख्षयद्वीराय सुम्न मस्मे ते अस्तु

। रख्षा च नो अधि च देव ब्रूह्यधा च नश्शर्म यच्छ

द्विबऱ्हा स्स्वाहा ॥

151. स्तुहि श्रुत ङ्गर्तसदं युवान म्मृग न्न भीम मुपहत्नु मुग्रम् ।

मृडा जरित्रे रुद्र स्तवानो अन्य न्ते अस्मन्नि वपन्तु सेना

स्स्वाहा ॥

152. परि णो रुद्रस्य हेति र्वृणक्तु परि त्वेषस्य दुर्मति रघायोः ।

अव स्थिरा मघवद्भ्य स्तनुष्व मीढ्व स्तोकाय तनयाय

मृडय स्वाहा ॥

153. मीढुष्टम शिवतम शिवो नस्सुमना भव । परमे वृख्ष आयुध

न्निधाय कृत्तिं वसान आचर पिनाक म्बिभ्र दा गहि स्वाहा ॥

154. विकिरिद विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रग्ं
हेतयो ऽन्य मस्मन्नि वपन्तु ता स्स्वाहा ॥

155. सहस्राणि सहस्रधा बाहुवो स्तव हेतयः । तासामीशानो
भगवः पराचीना मुखा कृधि स्वाहा ॥

156. सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् । तेषाग्ं
सहस्रयोजने ऽव धन्वानि तन्मसि स्वाहा ॥

157. अस्मि न्महत्यर्णवे ऽन्तरिख्षे भवा अधि । तेषाग्ं
सहस्रयोजने ऽव धन्वानि तन्मसि स्वाहा ॥

158. नीलग्रीवा श्शितिकण्ठा श्शर्वा अधः ख्षमाचराः । तेषाग्ं
सहस्रयोजने ऽव धन्वानि तन्मसि स्वाहा ॥

159. नीलग्रीवा श्शितिकण्ठा दिवग्ं रुद्रा उपश्रिताः । तेषाग्ं
सहस्रयोजने ऽव धन्वानि तन्मसि स्वाहा ॥

160. ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः । तेषाग्ं
सहस्रयोजने ऽव धन्वानि तन्मसि स्वाहा ॥

161. ये भूताना मधिपतयो विशिखासः कपर्दिनः । तेषाग्ं
सहस्रयोजने ऽव धन्वानि तन्मसि स्वाहा ॥

162. ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषाग्ं
सहस्रयोजने ऽव धन्वानि तन्मसि स्वाहा ॥

163. ये पथा म्पथिरक्षय ऐलबृदा यव्युधः । तेषाग्ं सहस्रयोजने
ऽव धन्वानि तन्मसि स्वाहा ॥

164. ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः । तेषाग्ं
सहस्रयोजने ऽव धन्वानि तन्मसि स्वाहा ॥

165. य एतावन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे । तेषाग्ं
सहस्रयोजने ऽव धन्वानि तन्मसि स्वाहा ॥

166. नमो रुद्रेभ्यो ये पृथिव्यां येषा मन्न मिषव स्तेभ्यो दश प्राची
र्दश दक्षिणा दश प्रतीची र्दशोदीची र्दशोर्ध्वा स्तेभ्यो
नमस्ते नो मृडयन्तु ते य न्द्विष्मो  यश्च नो द्वेष्टि तं वो जम्भे
दधामि स्वाहा ॥

167. नमो रुद्रेभ्यो येन्तरिक्षे येषां वात इषव स्तेभ्यो दश प्राची
र्दशदक्षिणा दश प्रतीची र्दशोदीची र्दशोर्ध्वा स्तेभ्यो
नमस्ते नो मृडयन्तु ते य न्द्विष्मो  यश्च नो द्वेष्टि तं वो जम्भे
दधामि स्वाहा ॥

168. नमो रुद्रेभ्यो ये दिवि येषां वर्ष मिषव स्तेभ्यो दश प्राची
र्दश दक्षिणा दश प्रतीची र्दशोदीची र्दशोर्ध्वा स्तेभ्यो

नमस्ते नो मृडयन्तु ते य न्द्विष्मो  यश्च नो द्वेष्टि तं वो जम्भे

दधामि स्वाहा ॥

169. त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम् । उर्वारुकमिव बंधना

ऽन्मृत्योर्मुक्षीय माऽमृता थ्स्वाहा ॥

170. यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना

विवेश तस्मै रुद्राय नमो अस्तु स्वाहा ॥

1. अग्नाविष्णू सजोषसेमा वर्धन्तु वा ङ्गिरः । द्युम्नै र्वाजेभि रा

गतग्ग् स्वाहा ॥

2. वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे

क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे

ज्योतिश्च मे सुवश्च मे प्राणश्च मे ऽपान श्च मे व्यानश्च मे
ऽसुश्च मे चित्त ञ्च म आधीत ञ्च मे वाक्च मे मनश्च मे
चख्षुश्च मे श्रोत्र ञ्च मे दख्षश्च मे बल ञ्च म ओजश्च मे
सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म
च मे वर्म च मे ऽज्गानि च मे ऽस्थानि च मे परूग्ंषि च
मे शरीराणि च मे स्वाहा ॥

3. ज्यैष्ठ्य ञ्च म आधिपत्य ञ्च मे मन्युश्च मे भामश्च मे
ऽमश्च मे ऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे
प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्ध ञ्च मे वृद्धिश्च
मे सत्य ञ्च मे श्रद्धा च मे जगच्च मे धन ञ्च मे वशश्च
मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जात ञ्च मे
जनिष्यमाण ञ्च मे सूक्त ञ्च मे सुकृत ञ्च मे वित्त ञ्च

मे वेद्य ञ्च मे भूत ञ्च मे भविष्यच्च मे सुग ञ्च मे
सुपथ ञ्च म ऋद्ध ञ्च म ऋद्धिश्च मे क्लुप्त ञ्च मे क्लु
प्तिश्च मे मतिश्च मे सुमतिश्च मे स्वाहा ॥

4. श ञ्च मे मयश्च मे प्रिय ञ्च मे ऽनुकामश्च मे कामश्च मे
सौमनसश्च मे भद्र ञ्च मे श्रेयश्च मे वस्यश्च मे यशश्च मे
भगश्च मे द्रविण ञ्च मे यन्ता च मे धर्ता च मे क्षेमश्च
मे धृतिश्च मे विश्व ञ्च मे महश्च मे संविच्च मे ज्ञात्र ञ्च
मे ऊश्च मे प्रसूश्च मे सीर ञ्च मे लयश्च म ऋत ञ्च मे
ऽमृत ञ्च मे ऽयक्ष्म ञ्च मे ऽनामयच्च मे जीवातुश्च मे
दीर्घायुत्व ञ्च मे ऽनमित्रञ्च मे ऽभय ञ्च मे सुग ञ्च मे
शयन ञ्च मे सूषा च मे सुदिन ञ्च मे स्वाहा ॥

5. ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृत ञ्च मे मधु

च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च
म औद्भिद्य ञ्च मे रयिश्च मे रायश्च मे पुष्ट ञ्च मे पुष्टिश्च मे
विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्ण ञ्च मे
पूर्णतर ञ्च मे ऽक्षितिश्च मे कूयवाश्च मे ऽन्न ञ्च मे
ऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे
मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च
मे ऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे स्वाहा ॥

6. अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे
सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मे ऽयश्च मे सीस
ञ्च मे त्रपुश्च मे श्याम ञ्च मे लोह ञ्च मे ऽग्निश्च म
आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्य ञ्च मे
ऽकृष्टपच्य ञ्च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन

कल्पन्तां वित्तञ्च मे वित्तिश्च मे भूत ञ्च मे भूतिश्च मे वसु
च मे वसतिश्च मे कर्म च मे शक्तिश्च मे ऽर्थश्च म एमश्च म
इतिश्च मे गतिश्च मे स्वाहा ॥

7. अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म
इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे
बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म
इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे
विष्णुश्च म इन्द्रश्च मे ऽश्विनौ च म इन्द्रश्च मे मरुतश्च म
इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म
इन्द्रश्च मे ऽन्तरिख्ष ञ्च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे
दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म
इन्द्रश्च मे स्वाहा ॥

8. अग्ंशुश्च मे रश्मिश्च मे ऽदाभ्यश्च मे ऽधिपतिश्च म
उपाग्ंशुश्च मे ऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म
आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म
आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म
ऋतुग्रहाश्च मे ऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे
मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे
सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे
स्वाहा ॥

9. इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे
चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मे ऽधिषवणे
च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म
आधवनीयश्च म आग्नीध्र ञ्च मे हविर्धान ञ्च मे गृहाश्च मे

सदश्च मे पुरोडाशाश्च मे पचताश्च मे ऽवभृथश्च मे
स्वगाकारश्च मे स्वाहा ॥ ९ ॥

10. अग्निश्च मे घर्मश्च मे ऽर्कश्च मे सूर्यश्च मे प्राणश्च मे
ऽश्वमेधश्च मे पृथिवी च मे ऽदितिश्च मे दितिश्च मे द्यौश्च मे
शक्वरी रङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम
च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे
व्रतञ्च मे ऽहोरात्रयो र्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन
कल्पेताग् स्वाहा ॥

11. गर्भाश्च मे वथ्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट्च मे
दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवथ्सश्च मे
त्रिवथ्सा च मे तुर्यवाट्च मे तुर्यौही च मे पष्ठवाच्च मे
पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मे

ऽनड्वा ञ्च मे धेनुश्च म आयु र्यज्ञेन कल्पता म्प्राणो यज्ञेन कल्पता मपानो यज्ञेन कल्पतां  व्यानो यज्ञेन कल्पता ञ्चख्षु र्यज्ञेन कल्पताग् श्रोत्रं यज्ञेन कल्पता म्मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पता मात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताग् स्वाहा ॥

12. एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविग्ंशतिश्च मे त्रयोविग्ंशतिश्च मे पञ्चविग्ंशतिश्च मे सप्तविग्ंशतिश्च मे नवविग्ंशतिश्च म एकत्रिग्ंशच्च मे त्रयस्त्रिग्ंशच्च मे चतस्रश्च मे ऽष्टौ च मे द्वादश च मे षोडश च मे विग्ंशतिश्च मे चतुर्विग्ंशतिश्च मे ऽष्टाविग्ंशतिश्च मे द्वात्रिग्ंशच्च मे षट्त्रिग्ंशच्च मे

चत्वारिग्ंशच्च मे चतुश्चत्वारिग्ंशच्च मे ऽष्टाचत्वारिग्ंशच्च मे
वाजश्च प्रसवश्चा ऽपिजश्च क्रतुश्च सुवश्च मूर्धा च
व्यश्ञियश्चा ऽऽन्त्यायनश्चा ऽन्त्यश्च भौवनश्च भुवनश्चा
ऽधिपतिश्च स्वाहा ॥

13. ओं इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि
शग्ंसिषद्विश्वेदेवा स्सूक्तवाचः पृथिवि मातर्मा मा
हिग्ंसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु
वदिष्यामि मधुमती न्देवेभ्यो वाचमुद्यासग्ं शुश्रूषेण्या
म्मनुष्येभ्यस्त म्मा देवा अवन्तु शोभायै पितरो ऽनुमदन्तु
स्वाहा ॥

ओं शान्ति श्शान्ति श्शान्तिः ॥